2 वार्तालापः



भावेशः : नमस्कारः

चेतना : नमस्कारः, भावेश, आगच्छतु। सर्वं कुशलं वा ?

भावेशः : सर्वं कुशलम्।

चेतना : उपविशतु। जलं स्वीकरोतु।

भावेशः : धन्यवादः।

चेतना : चायं कोफी वा ?

भावेशः : किमपि मास्तु। इदानीं भोजनम् आवश्यकम्।

चेतना : भोजनं सिद्धम् एव अस्ति। आसन-ग्रहणं करोतु।

भावेशः : कृपया परिवेशयतु। भोजने किं किम् अस्ति ?

चेतना : भोजने व्यञ्जनम् अस्ति, रोटिका अस्ति, मोदकः अस्ति, अवलेहः अस्ति, ओदनम् अस्ति च दालम् अपि अस्ति।

भावेशः : तर्हि शीघ्रं ददातु।

चेतना : स्वीकरोतु। लवणम् आवश्यकं वा ?

भावेशः : आम्, ददातु। किञ्चित् तक्रम् अपि आवश्यकम्।

चेतना : स्वीकरोतु। एकं मोदकम् अपि स्वीकरोतु।

भावेशः : धन्यवादः। एकां रोटिकाम् अपि ददातु।

चेतना : अवलेहः अपि अस्ति। आवश्यकं वा ?

भावेशः : मास्तु। इदानीम् ओदनं ददातु।

चेतना : स्वीकरोतु। दालम् अपि स्वीकरोतु।

भावेशः : धन्यवादः।

चेतना : अन्यत् किमपि आवश्यकम् ?

भावेशः : इदानीं किमपि मास्तु। मम भोजनं समाप्तम्। भोजनं रुचिकरम् अस्ति।

चेतना : धन्यवादः।

टिप्पणी

किमपि કાંઈપણ **मास्तु** નહિ. **इदानीम्** હવે **सिद्धम्** તૈયાર **परिवेशयतु** પીરસો. **व्यञ्जनम्** શાક **अवलेहः** અથાણું **तक्रम्** છાશ **मोदकः** લાડુ **लवणम्** મીઠું **किञ्चत्** થોડુંક

स्वाध्यायः

1. નીચે આપેલા ઉદાહરણ અનુસાર વાક્યો બનાવો :

ઉદાહરણ : भोजनं सिद्धम् एव अस्ति।

भोजनंની જગ્યાએ चित्रम्, दालम्, व्यञ्जनम्, चायम्, ओदनम् નો ઉપયોગ કરીને અન્ય વાક્યો બનાવો.

(1) चित्रं _____ ।

(2) दालं _____ ।

(3) व्यञ्जनं _____ ।

(4) चायं _____ ।

(5) ओदनं _____ ।

2. નીચે આપેલા ઉદાહરણ અનુસાર વાક્યો બનાવો :

ઉદાહરણ : किञ्चित् तक्रम् आवश्यकम्।

(1) _____ । (दुग्धम्)

(2) _____ । (जलम्)

(3) _____ । (पायसम्)

(4) _____ । (व्यञ्जनम्)

3. નીચે આપેલા ઉદાહરણ અનુસાર વાક્યો બનાવો :

ઉદાહરણ : तक्रम् आवश्यकं वा।

(1) _____ ? (व्यञ्जनम्)

(2) _____ ? (दुग्धम्)

(3) _____ ? (ओदनम्)

(4) _____ ? (दालम्)

(5) _____ ? (अवलेहः)

4. વિચારીને સંવાદ તૈયાર કરો :

माता : उपविशतु। जलं स्वीकरोतु।

पुत्री : _____।

माता : स्वीकरोतु।

पुत्री : धन्यवादः _____।

माता : किञ्चित् तक्रम् _____।

पुत्री : ददातु।

माता : लवणम् _____?

पुत्री : _____।

माता : ओदनं स्वीकरोतु।

पुत्री : _____।

माता : _____।

पुत्री : _____।

माता : _____।

पुत्री : _____।

5. તમારા ઘરે બનતી ભોજનની વાનગીઓની યાદી બનાવો.

6. કૌંસમાં આપેલા શબ્દોનો ઉપયોગ કરી ઉદાહરણ મુજબ વાક્યો બનાવો અને લખો :

(चषकः, मेघः, स्थालिका, जलम्, छत्रम्, भोजनम्, पुष्पम्, उद्यानम्, फलम्, वृक्षः, कक्षः, छात्रः ।)

ઉદાહરણ : चषकः अस्ति जलं नास्ति।

(1) _____ अस्ति _____ नास्ति।

(2) _____ अस्ति _____ नास्ति।

(3) _____ अस्ति _____ नास्ति।

(4) _____ अस्ति _____ नास्ति।

(5) _____ अस्ति _____ नास्ति।

(6) _____ अस्ति _____ नास्ति।